# Vishnukritam Shiva Stotram 1

# વિષ્ણુકૃતં શિવસ્તોત્રમ્ ૧

## Document Information

Text title : Vishnukritam Shiva Stotram

File name : viShNukRRitaMshivastotram1.itx

Category : shiva, stotra, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 10 | 518-556||

Latest update : March 8, 2024

Send corrections to : sanskrit at cheerful dot c om


This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**


Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2024

*sanskritdocuments.org*

# Vishnukritam Shiva Stotram 1

# વિષ્ણુકૃતં શિવસ્તોત્રમ્ ૧

વિષ્ણુરુવાચ -
મહેશાનન્તાદ્યત્રિગુણરહિતામેય વિમલ
સ્વરાકારાપારામિતગુણગણાકાર ગિરિશ ।
નિરાધારાધારામરવર નિરાકાર પરમ
પ્રભાપૂરાકારાવરપર નમોઽવેદ્ય શિવ તે ॥ ૫૧૮॥

નમો વેદાવેદ્યાખિલજગદુપાદાનનિયત
સ્વતન્ત્રા સામન્તા નવ ધૃત નિકારાકારવિરતે ।
નિવર્તન્તે વાચઃ શિવમજરમપ્રાપ્ય મનસા
યતોઽશક્તાસ્સ્તોતું સકૃદપિ ગુણાતીત શિવ તે ॥ ૫૧૯॥

ત્વદન્યં(દ્)વસ્ત્વેકં ન હિ ભુવિ સમસ્તં ન ભવતો-
વિભિન્નં વિશ્વાત્મન્ ન ચ પરમમસ્ત્વીશ ભવતઃ ।
ધ્રુવં માયાતીતસ્ત્વમસિ સતતં નાત્ર વિશયઃ
કૃતં કૃત્યં કિઞ્ચિત્ક્વચિદપિ નમો વાસ્તુ શિવ તે ॥ ૫૨૦॥

(ત્વમેવર્દંલો) ત્વમેવેદમ્લોકે નિખિલમમલં વ્યાપ્ય સતતં
તથૈવાન્યં લોકં સ્થિમનઘ દેવોત્તમ વિભો ।
ત્વયૈવૈતત્સૃષ્ટં જગદખિલમીશાન ભગવન્
વિલાસોઽયં કશ્ચિત્તવ શિવ નમોઽમેય શિવ તે ॥ ૫૨૧॥

જગત્સૃષ્ટં પૂર્વં શિવયદિદમુમાકાન્ત સતતં
ત્વયા લીલામાત્રાત્તદપિ સકલં રક્ષિતમભૂત્ ।
તદેવાગ્રે ભાલપ્રકટનયનાગ્ન્યદ્ભુતકણૈઃ
સ્વયં દગ્ધ્વા સ્થાસ્યસ્યજ હર નમોઽવેદ્ય શિવ તે ॥ ૫૨૨॥

વિભૂતીનામન્તો ભવ ન ભવતો ભૂતિવિલસ-
ન્નિજાકાર શ્રીમન્ ન તવ ગુણસીમાપ્યવગતા ।
અતદ્વ્યાવૃત્ત્યાદ્ય ત્વયિ સકલ વેદાશ્ચ ચકિતાઃ

ભવન્ત્યેવાસામપ્રકૃતિગ નમો વર્ષ્ય શિવ તે ॥ ૫૨૩॥

વિરાડ્રૂપં યત્તે સકલનિગમાગોચરભભૂ-
ત્તદેવં રૂપં તે ભવતિ કિમિદં ભિન્નમથવા ।
ન જાને દેવેશ ત્રિણયન સુરારાધ્યચરણ
ત્વમોઙ્કારો વેદસ્ત્વસ્મસિ હિ નમોઽઘોર શિવ તે ॥ ૫૨૪॥

યદન્તસ્ત્વજ્ઞાનાન્મુનિવરગણા રૂપમનઘં
તદેવં સઞ્ચિન્ત્ય સ્વમનસિ સદા સઙ્ગવિહિતાઃ ।
યયુર્દિવ્યાનન્દં તદિદમથવા કિન્તુ ન તથા
કિમેતજ્જાનેઽહં શરણમગમં શર્વ શિવ તે ॥ ૫૨૫॥

યયા શક્ત્યા સૃષ્ટ્વા જગદથ ચ સંરક્ષ્ય બહુધા
તતઃ સંહૃત્યૈતન્નિવસસિ તદાધારમથવા ।
ઇદં તે કિં રૂપં નિરુપમ ન જાને હર વિભો
નિસર્ગઃ કોવા તે તમપિ હિ નમો ભવ્ય શિવ તે ॥ ૫૨૬॥

તવાનન્તાન્યાહુઃ શુચિપરમરૂપાણિ નિગમા-
સ્તદન્તસ્થં યત્તત્સદસદનિરુક્તં સ્થિરમપિ ।
નિરુક્તં છન્દોભિર્નિલયનમિદં ચા નિલયનં
ન વિજ્ઞાતં જ્ઞાતં સકૃદપિ નમો જ્યેષ્ઠ શિવ તે ॥ ૫૨૭॥

તવાભૂત્સત્યત્વાનૃતમપિ ચ સત્યં કૃતમભૂત્
ઋતં સત્યં સત્યં કૃતમુભયથારૂપકમલમ્ ।
યતઃ સત્યં સત્યં સમમપિ સમસ્તં તવ વિભો
અતઃ સત્યં સત્યં કૃતમપિ નમો રુદ્ર શિવ તે ॥ ૫૨૮॥

તવાહારં હારં વિદિતમપિ હારં વિહરસે
નવાહારં હારં હરસિ હર હારં ન હરસિ ।
નવાહારં હારં પરતરવિહારં પરતરં
પરં પારં જાને ન હિ નહિ નમો વિશ્વ શિવ તે ॥ ૫૨૯॥

યદેતત્તત્ત્વં તે સકલમપિ તત્ત્વેન વિદિતં
ન તત્તત્ત્વં તત્ત્વં વિદિતમપિ તત્ત્વેન વિદિતમ્ ।
ન ચૈતત્તત્ત્વં ચેન્નિયતમપિ તત્ત્વં કિમુ ભવે-
ન્ન તે તત્ત્વં તત્ત્વં પરતર નમો ધિષ્ણ્ય શિવ તે ॥ ૫૩૦॥

ઇદં રૂપં રૂપં સદસદમલં રૂપમિતિ ચે-
ન્ન જાને રૂપં તત્તરતમવિભિન્નં પદતરમ્ ।
યતો નાન્યદ્રૂપં નિરતમપિ વેદૈર્નિગદિતં
ન જાને સર્વાત્મન્ ક્વચિદપિ નમોઽનન્ન શિવ તે ॥ ૫૩૧॥

મહત્દ્ભૂતં ભૂતં યદપિ ચ ભૂતં તવ વિભો
સદા ભૂતં ભૂતં કિમુત ભવતો ભૂતવિષયૈઃ ।
યદા ભૂતં ભૂતં ભવતિ ચ ન ભૂતં ચ ભવતુ
પ્રભાભૂતં ભૂતં ભવતિ હિ નમો યષ્ટ શિવ તે ॥ ૫૩૨॥

વશીભૂતા ભૂતાઃ સતમપિ ભૂતાત્મકતયા
ન ભૂતા ભૂતાસ્તે તવ યદપિ ભૂતા વિભુતયા ।
યતો ભૂતા ભૂતાસ્તવ તુ ન હિ ભૂતાત્મકતયા
ન વા ભૂતા ભૂતા ક્વચિદપિ નમો ભૂત શિવ તે ॥ ૫૩૩॥

ન તે માયા માયા સતતમપિ માયામયતયા
ધ્રુવં માયા મય્યા ત્વયિ વર ન માયામયમપિ ।
યદા માયા માયા ન ખલુ-સા માયયતયા
ન માયા માયા યા પરમિયમતસ્તે શિવમયા ॥ ૫૩૪॥

યદન્તઃ સંવેદ્ય વિદિતમપિ વેદૈર્ન વિદિતં
ન વેદ્યં વેદ્યં ચેન્નિયતમપિ વેદ્યં ન વિદિતમ્ ।
તદેવેદં વેદ્યં વિદિતમપિ વેદાન્તનિકરૈઃ
કરાવેદ્યં વેદ્યં જિત મિતિ નમોઽતર્ક્યં શિવ તે ॥ ૫૩૫॥

શિવં શૈવં ભાવં શિવમપિ શિવાકારમશિવં
ન સત્યં શૈવં તચ્છિવમિતિ શિવં શૈવમ નિશમ્ ।
શિવં શાન્તં મત્વા શિવપરમતત્ત્વં શિવમયં
ન જાને તત્તત્ત્વં શિવમિતિ નમોઽભેદ્ય શિવ તે ॥ ૫૩૬॥

યદજ્ઞાત્વા તત્ત્વં સકલમપિ સંસારપતિતં
જગજ્જન્માવૃત્તિં વહતિ સતતં દુઃખનિલયમ ।
તદેતજ્જ્ઞાત્વૈવાવહતિ ચ નિવૃત્તિં પરતરાં
ન જાને તત્તત્ત્વં પરમિતિ નમો રેષ્ય શિવ તે ॥ ૫૩૭॥

તવેદં યદ્રૂપં નિગમવિષયં મઙ્ગલકરં
ન દૃષ્ટં કેનાપિ ધ્રુવમિતિ વિજાને શિવ વિભો ।

તતશ્ચિત્તે શમ્ભો નહિ મમ વિશદેઽતોઘવિકૃતિઃ
પ્રયત્નાલ્લભ્યેઽસ્મિન્ન કિમપિ નમઃ પૂર્ણ શિવ તે ॥ ૫૩૮॥

તવાકર્ણં ગૂઢં યદપરમચક્ષુઃ શ્રુતિપરં
તદેવાપાદં સન્નયનપદવીં નાવ તનુતે ।
(કદા) કદાચિત્કિઞ્ચિદ્વા સ્ફુરતુ કૃપયા ચેતસિ તવ
સ્ફુરદ્રૂપં ભવ્યં ભવહર નમો નાથ શિવ તે ॥ ૫૩૯॥

ત્વમિન્દુર્ભાનુસ્ત્વં હુતભુગસિ વાયુશ્ચ સલિલં
ત્વમેવાકાશોઽસિ ક્ષિતિરસિ તથાત્માસિ ભગવન્ ।
તતઃ સર્વાકારસ્ત્વમસિ ભવતો ભિન્નમણુ ચ
ન તત્સત્યં સત્યં ત્રિણયન નમોઽનન્ત શિવ તે ॥ ૫૪૦॥

વિધું ધત્સે નિત્યં શિરસિ મૃદુ કણ્ઠેઽપિ ગરલં
નવં નાગા હારા ભસિતમમલં ભાસુરતનૌ ।
કરે શૂલં ભાલે જ્વલનમનિશં તત્કિમિતિ તે
ન તત્ત્વં જાનેઽહં ભવહર નમઃ કૂપ્ય શિવ તે ॥ ૫૪૧॥

તવાપાઙ્ગસ્યન્દો યદિ ભવતિ ભવ્યઃ શુભકરઃ
કદાચિત્કસ્મિંશ્ચિલ્લઘુતરનરેઽપિ પ્રભવતિ ।
સ એવૈતલ્લોકાન્ વિરચિતુમલ્પોઽપિ સ મહાન્
કૃપાધારાયત્તો સુખકર નમોઽનન્ત શિવ તે ॥ ૫૪૨॥

ભવન્તં દેવેશં શિવમિતરગીર્વાણસદૃશં
પ્રમાદાદ્યઃ કશ્ચિદ્યદિ વદતિ ચિત્તેઽપિ મનુતે ।
સ દુઃખં લબ્ધ્વાઽન્તે નરકમપિ યાતિ ધ્રુવમિદં
ધ્રુવં દૈવારાધ્યામિતગુણ નમોઽનન્ત શિવ તે ॥ ૫૪૩॥

પ્રદોષે રત્નાઢ્યે મૃદુલતરસિંહાસનવરે
ભવાનીમારૂઢામસકૃદપિ સંવીક્ષ્ય ભવતા ।
કૃતં સમ્યઙ્ નાટ્યં પ્રથિતમિતિ વેદોઽપિ વદતિ
પ્રભાવઃ કો વાઽયં તવ હર નમો દીપ્ય શિવ તે ॥ ૫૪૪॥

શ્મશાને સઞ્ચારસ્તવ કિલ ન તે ક્વાપિ ગમનં
યતો વિશ્વં વ્યાપ્યાખિલમપિ સદા તિષ્ઠતિ ભવાન્ ।
વિભું નિત્યં શુદ્ધં શિવમયમતો વ્યાપકમિતિ
શ્રુતિઃ સાક્ષાદ્વક્તિ સ્વયમપિ નમઃ સૂધ શિવ તે ॥ ૫૪૫॥

ધનુર્મેરુઃ શેષોઽપ્યથ વરગુણો યાનમવનિ-
સ્તવેનેન્દ્ર ચક્રે નિગમનિકરા વાજિનિકરાઃ ।
પુરો લક્ષ્યં યન્તા વિધિરિષુરહં ચેતિ નિગમઃ
કિમેવં ત્વય્યેષો નિગદતિ નમઃ પર્ણ્ય શિવ તે ॥ ૫૪૬॥

મૃડં સત્ત્વોપેતં ભવમનતિરિક્તં ચ રજસા
તમોયુક્તં શુદ્ધં શિવમપિ શિવં નિષ્કલમિતિ ।
વદત્યેષો (વં) વેદસ્ત્વમસિ તદુપાસ્યં ધ્રુવમિદં
ત્વમોઙ્કારાકારો ધ્રુવમિતિ નમોઽનન્ત શિવ તે ॥ ૫૪૭॥

જગત્સુપ્તિં બોધં વ્રજતિ ભવતો નિર્ગતમપિ
પ્રવૃત્તિં વ્યાપારં પુનરપિ સુષુપ્તિં ચ સકલમ્ ।
ત્વદન્યં ત્વત્પ્રાયં વ્રજતિ શરણં નેતિ નિગમો
વદત્યદ્ધા સર્વં શિવમિતિ નમ સ્તુત્ય શિવ તે ॥ ૫૪૮॥

ત્વમેકો લોકાનામધિપતિરુમાનાથ જગતાં
શરણ્યઃ પ્રાપ્યસ્ત્વં જલનિધિરિવાનન્તપયસામ્ ।
ત્વદન્યો નિર્વાણં ન વિતરતિ નિર્વાણપતિર-
પ્યતઃ સર્વોત્કૃષ્ટસ્ત્વમસિ હિ નમો નીપ્ય શિવ તે ॥ ૫૪૯॥

તવૈવાંશો ભાનુસ્તપતિ વિધુરપ્યેતિ પવનઃ
પવત્યેષો વહ્નિર્જ્વલતિ સલિલં ચાપિ વહતિ ।
ત્વદાજ્ઞાકારિત્વં સકલસુરવર્ગસ્ય સતતં
ત્વમેકઃસ્વાતન્ત્ર્યં વહસિ હિ નમોઽનન્ત શિવ તે ॥ ૫૫૦॥

સ્વતન્ત્રોઽયં સોમઃ સકલ ભુવનૈકપ્રભુરયં
નિયન્તા દેવાનામયમિહ નિયન્તાઽસ્ય ન પરઃ ।
શિવઃસિદ્ધોઽપાયાદ્રહિત ઇતિ વેદોઽપિ વદતિ
સ્વયં ત્વામાશાસ્યં ભયહર નમો રથ્ય શિવ તે ॥ ૫૫૧॥

નમો રુદ્રાનન્તાનઘ હર નમઃ શ્રીધર વિભો
નમો ગૌરીનાથ ત્રિણયન શરણ્યાઙ્ઘ્રિકમલ ।
નમઃ શર્વ શ્રીમન્નનઘમહદૈશ્વર્યનિલય
સ્મરારે પાપારે જય જય નમઃ શોચ્ય શિવ તે ॥ ૫૫૨॥

મહાદેવામેયાનઘગુણગણગ્રામ સતતં

નમો ભૂયોઃ ભૂયઃ પુનરપિ નમસ્તે પુનરપિ ।
પુરારાતે શમ્ભો પુનરપિ નમસ્તે શિવ શિવ
નમો ભૂયોભૂયઃ શિવ શિવ નમોઽનન્ત શિવ તે ॥ ૫૫૩॥

કદાચિદ્વણ્યન્તે નિબિડનિપતદ્વૃષ્ટિકણિકાઃ
કદાચિન્નક્ષત્રાણ્યપિ સિકતલેશાઃ કુશલિભિઃ ।
અનન્તૈરાકલ્પં શિવગુણગણાંશ્ચારુરસનૈ-
ર્નશક્યન્તે નૂનં ગણયિતુમુષિત્વાપિ સતતમ ॥ ૫૫૪॥

મયાઽવિજ્ઞાયેશાનિશમપિ કૃતા યે તુ મનસા
સકામેનામેયાઃ સતતમપરાધા બહુવિધાઃ ।
ત એવ (ત્વયૈવ) ક્ષન્તવ્યાઃ ક્વચિદપિ શરીરેણ વચસા
કૃતા નૈતે નૂનં શિવ શિવ કૃપાસાગર વિભો ॥ ૫૫૫॥

પ્રમાદાદ્યૈકેચિદ્વિતતમપરાધા વિધિહતા
કૃતાઃ સર્વે તેઽપિ પ્રશમમુપયાન્તુ સ્પુટતરમ્ ।
શિવ શ્રીમન્ શમ્ભો શિવ શિવ મહેશેતિ ચ જપન્
ક્વચિલ્લિઙ્ગાકારે શિવ હર વસામિ સ્થિરતરમ્ ॥ ૫૫૬॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે વિષ્ણુકૃતં શિવસ્તોત્રં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૧૦ । ૫૧૮-૫૫૬॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 10 . 518-556..

Proofread by Ruma Dewan

*Vishnukritam Shiva Stotram 1*

pdf was typeset on March 8, 2024

Please send corrections to *sanskrit@cheerful.com*